# Shri Hanumad Ashtottarashatanama Stotram from Ramarahasya

# શ્રીરામરહસ્યોક્તં શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shri Hanumad Ashtottarashatanama Stotram from Ramarahasya

File name : hanumadaShTottarashatanAmastotram10.itx

Category : hanumaana, aShTottarashatanAma

Location : doc_hanumaana

Transliterated by : Shree Devi Kumar shreeshrii at gmail.com

Proofread by : Shree Devi Kumar shreeshrii at gmail.com

Description/comments : from Ramarahasya, in Rama Bhakti Kalpalata Part 1

Latest update : April 25, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીરામરહસ્યોક્તં શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્

। શ્રીસીતારામૌ વિજયેતે ।

હનુમાનઞ્જનાસૂનુર્ધીમાન્ કેસરિનન્દનઃ ।
વાતાત્મજો વરગુણો વાનરેન્દ્રો વિરોચનઃ ॥ ૧॥

સુગ્રીવસચિવઃ શ્રીમાન્ સૂર્યશિષ્યસ્સુખપ્રદઃ ।
બ્રહ્મદત્તવરો બ્રહ્મભૂતો બ્રહ્મર્ષિસન્નુતઃ ॥ ૨॥

જિતેન્દ્રિયો જિતારાતી રામદૂતો રણોત્કટઃ ।
સઞ્જીવિનીસમાહર્તા સર્વસૈન્યપ્રહર્ષકઃ ॥ ૩॥

રાવણાકમ્પ્યસૌમિત્રિનયનસ્ફુટભક્તિમાન્ ।
અશોકવનિકાચ્છેદી સીતાવાત્સલ્યભાજનમ્ ॥ ૪॥

વિષીદદ્ભૂમિતનયાર્પિતરામાઙ્ગુલીયકઃ ।
ચૂડામણિસમાનેતા રામદુઃખાપહારકઃ ॥ ૫॥

અક્ષહન્તા વિક્ષતારિસ્તૃણીકૃતદશાનનઃ ।
કુલ્યાકલ્પમહામ્ભોધિસ્સિંહિકાપ્રાણનાશનઃ ॥ ૬॥

સુરસાવિજયોપાયવેત્તા સુરનરાર્ચિતઃ ।
જામ્બવન્નુતમાહાત્મ્યો જીવિતાહતલક્ષ્મણઃ ॥ ૭॥

જમ્બુમાલિરિપુર્જમ્ભવૈરિસાધ્વસનાશનઃ ।
અસ્ત્રાવધ્યો રાક્ષસારિસ્સેનાપતિવિનાશનઃ ॥ ૮॥

લઙ્કાપુરપ્રદગ્ધા ચ વાલાનલસુશીતલઃ ।
વાનરપ્રાણસન્દાતા વાલિસૂનુપ્રિયઙ્કરઃ ॥ ૯॥

મહારૂપધરો માન્યો ભીમો ભીમપરાક્રમઃ ।
ભીમદર્પહરો ભક્તવત્સલો ભર્ત્સિતાશરઃ ॥ ૧૦॥

રઘુવંશપ્રિયકરો રણધીરોરયાકરઃ ।

ભરતાર્પિતસન્દેશો ભગવચ્છિલષ્ટવિગ્રહઃ ॥ ૧૧॥

અર્જુનધ્વજવાસી ચ તર્જિતાશરનાયકઃ ।
મહાન્ મહામધુરવાઙ્મહાત્મા માતરિશ્વજઃ ॥ ૧૨॥

મરુન્નુતો મહોદારગુણો મધુવનપ્રિયઃ ।
મહાધૈર્યો મહવીર્યો મિહિરાધિકકાન્તિમાન્ ॥ ૧૩॥

અન્નદો વસુદો વાગ્મી જ્ઞાનદો વત્સલો વશી ।
વશીકૃતાખિલજગદ્વરદો વાનરાકૃતિઃ ॥ ૧૪॥

ભિક્ષુરૂપપ્રતિચ્છન્નોઽભીતિદો ભીતિવર્જિતઃ ।
ભૂમીધરહરોભૂતિદાયકો ભૂતસન્નુતઃ ॥ ૧૫॥

ભુક્તિમુક્તિપ્રદો ભૂમા ભુજનિર્જિતરાક્ષસઃ ।
વાલ્મીકિસ્તુતમાહાત્મ્યો વિભીષણસુહૃદ્વિભુઃ ॥ ૧૬॥

અનુકમ્પાનિધિઃ પમ્પાતીરચારી પ્રતાપવાન્ ।
બહ્માસ્ત્રહતરામાદિજીવનો બ્રહ્મવત્સલઃ ॥ ૧૭॥

જયવાર્તાહરો જેતા જાનકીશોકનાશનઃ ।
જાનકીરામસાહિત્યકારી જનસુખપ્રદઃ ॥ ૧૮॥

બહુયોજનગન્તા ચ બલવીર્યગુણાધિકઃ ।
રાવણાલયમર્દી ચ રામપાદાબ્જવાહકઃ ॥ ૧૯॥

રામનામલસદ્ભક્તો રામાયણકથાદૃતઃ ।
રામસ્વરૂપવિલસન્માનસો રામવલ્લભઃ ॥ ૨૦॥

ઇત્થમષ્ટોત્તરશતં નામ્નાં વાતાત્મજસ્ય યઃ ।
અનુસન્ધ્યં પઠેત્તસ્ય મારુતિસ્સંપ્રસીદતિ ॥ ૨૧॥

પ્રસન્ને મારુતૌ રામો ભુક્તિમુક્તી પ્રયચ્છતિ ।

ઇતિ શ્રીરામરહસ્યોક્તં શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by Shree Devi Kumar shreeshrii at gmail.com

*Shri Hanumad Ashtottarashatanama Stotram from Ramarahasya*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*